# 2021

## SANSKRIT — HONOURS

**Paper : CC-2**

**(Critical Survey of Sanskrit Literature)**

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**Section – A**

**(Marks : 30)**

**Unit – I**

1. अधोलिखितेषु यथेच्छं ***प्रश्नद्वयस्य*** उत्तरं लेख्यम्।

(क) दार्शनिकसूक्तम् इति पदेन किं बुध्यते? ऋकसंहितायां कतिविधानि दार्शनिकसूक्तानि दृश्यन्ते? तेषु यथेच्छं चतुर्णां नामानि उल्लिख्य यथेच्छमेकमधिकृत्य आलोच्यताम्। 2+2+2+4

(ख) किं नाम साम? अधुना कति शाखाः उपलभ्यन्ते? काश्च ताः? सामसंहितायाः परिचयः संक्षिप्ततया प्रदीयताम्। 2+1+1+6

(ग) आथर्वणसंहितायाः कियत्यःशाखाः? संहितायामस्यां कति कण्डिका विद्यन्ते? तत्र काव्यसौन्दर्योपेतानि यानि सूक्तानि उपलभ्यन्ते तेषु कस्यचन एकस्य विषयः सविस्तरम् आलोच्यताम्। 1+1+8

(घ) ऋग्वेदस्य आविर्भावकालमधिकृत्य भारतीयानां वैदेशिकानां च ये मतवादाः सन्ति, तेषु यथाभिमतं किमपि द्वितयम् अवलम्ब्य विचारः क्रियताम्। 5+5

**Unit – II**

2. ***दशप्रश्नाः*** समाधेयाः अतिसंक्षेपेण (तेषु **नवप्रश्नाः सुरगिरा देवनागरलिप्या** च लेखनीयाः) 1×10

(क) ऐतरेयब्राह्मणस्य द्रष्टा ऋषिः कः?

(ख) सामवेदे कति ब्राह्मणानि उपलभ्यन्ते?

(ग) किं नाम शुक्लयजुर्वेदस्य ब्राह्मणम्?

(घ) कस्या अपि एकस्या अथर्ववेदीयायाः उपनिषदः नाम लिख्यताम्।

(ङ) कृष्णयजुर्वेदस्य आरण्यकस्य नाम किम्?

(च) वेदपुरुषस्य श्रोत्रं किम् नाम वेदाङ्गम्?

Please Turn Over

(छ) बृहद्देवता केन विरचिता?

(ज) कस्यचन एकस्य ऋग्वेदीयश्रौतसूत्रस्य नाम लेख्यम्।

(झ) किं तावत् शुल्वसूत्रम्?

(ञ) गायत्री इति वैदिकच्छन्दसि कति अक्षराणि विद्यन्ते?

(ट) कठोपनिषद् कस्मिन् वेदे सम्बद्धा?

(ठ) निरुक्तग्रन्थस्य प्राचीनतमो टीकाकारः कः?

**Section – C**

**(Marks : 15)**

**Unit – I**

3. अधःप्रदत्तयोः प्रश्नयोः ***एकतरस्य*** उत्तरं ***सुरगिरा देवनागरलिप्या*** च प्रदेयम्।

(क) महाभारतस्य रचयिता कः? महाभारते प्रथमं पर्व किं? नलोपाख्यानं महाभारतस्य कस्मिन् पर्वणि उपवर्णितम्? स्वभाषया तदुपाख्यानं विब्रियताम्। 1+1+1+7

(ख) महाभारतस्य नामान्तरमेकम् उल्लेख्यम्। महाभारतस्य प्रसिद्धस्य टीकाकारद्वयस्य नाम लेखनीयम्। ग्रन्थस्यास्य विरचनकालमधिकृत्य संक्षेपेण आलोच्यताम्। 1+2+7

**Unit – II**

4. यथामति ***एकः*** प्रश्नः समाधेयः। 5

(क) महाभारताश्रिताः भास-नाट्यकृतयः।

(ख) भारतीयसंस्कृतौ महाभारतस्य गुरुत्वम्।

**Section – E**

**(Marks : 20)**

**Unit – I**

5. अधोदत्तेषु यथेच्छं विषयम् ***एकमा***श्रित्य टीका लेख्या। 5

भर्तृहरिः, दीक्षितः, पाणिनिः।

## Unit – II

**6.** अतिसंक्षिप्ततया निम्नप्रदत्तेषु ***पञ्चानां*** प्रश्नानाम् उत्तरं ***संस्कृतभाषया देवनागरलिप्या*** च प्रदेयम्। 2×5

(क) गौतमस्य महानिर्वाणं कुत्राभवत्?

(ख) मीमांसादर्शने कति प्रमाणानि स्वीकृतानि? कानि च तानि?

(ग) न्यायसूत्रं केन प्रणीतम्? तत्र कति अध्यायाः सन्ति?

(घ) वेदान्तदर्शने प्रस्थानत्रयं किम्?

(ङ) चार्वाकदर्शनस्य प्रवक्ता कः? दर्शनस्यास्य नामान्तरद्वयं लेख्यम्।

(च) वैशेषिकदर्शने कति द्रव्याणि स्वीकृतानि? कानि च तानि?

(छ) सांख्यकारिका केन प्रणीता? ग्रन्थस्यास्य कस्यचिद् एकस्य भाष्यकारस्य नाम लेख्यम्।

## Unit – III

**7.** अधोदत्तेषु विषय***मेकमा***श्रित्य टिप्पणी कार्या। 5

काव्यप्रकाशः, आनन्दवर्धनः, राजशेखरस्य काव्यमीमांसा।

---